ओ३म्

गुरुकुल-पत्रिका

[गुरुकुल कांगड़ी विश्वविद्यालयस्य मासिक पत्रिका]

चैत्र २०२४, मार्च-अप्रैल १९६८, वर्षम् २०, अङ्कः ८, पूर्णाङ्कः २३६

श्रुति-सुधा

(ऋषि -मेधातिथि काण्व । देवता-ऋभव । छन्द – गायत्री)

युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः ।
ऋभवो विष्ट्यक्रत ॥ ऋ० १।२०।४

(ऋजूयवः) सरल मार्ग का अवलम्बन करने वाले (सत्यमन्त्रा) सत्यज्ञान वाले (ऋभवः) ऋभुओं ने (पितरा) मन और बुद्धिरूपी पितरों को (पुनः) फिर (युवाना विष्टी अक्रत) युवा तथा सर्वत्र व्यापक कर दिया।

दिव्य मन व बुद्धिसूर्य की ये रश्मियां जब ऋत से देदीप्यमान हो जाती हैं तब इन की गति अत्यन्त सरल (ऋजु) होती है, और इन का ज्ञान सदा सत्य होता है। इन के माता और पिता ये मन और बुद्धि हैं। वृद्धावस्था मे मनुष्य की मन और बुद्धि आदि सभी इन्द्रियां शिथिल व जीर्ण शीर्ण हो जाती हैं। परन्तु ऋत के आने से ये मन बुद्धि आदि फिर युवा तथा शक्तिसम्पन्न बन जाते हैं और ब्रह्माण्ड में सर्वत्र व्याप्त (विष्टी) होने की शक्ति इन में जागृत हो जाती है।

(गतमासाङ्कतोऽग्रे)

अग्निसंहिता

मूललेखकः—श्री अरविन्दः, अनुवादकः मुखबन्धलेखकश्च श्री जगन्नाथो वेदालंकार

अन्तर्यज्ञस्य यजमानपुरोहितादयः

ननु यजमानपुरोहितान् हविः समिदादिपदार्थांश्चान्तरा न कोऽपि यज्ञः सिद्ध्यति। तर्हि अस्मिन् दिव्यसङ्कल्पाग्नौ यो यज्ञोऽनुष्ठीयते तस्य किं स्वरूपं, तत्र को यजमानः, के पुरोहिताः, किं हविः, का समिधः, किञ्च तस्य यज्ञस्य फलम्? तत्रोच्यते। देवत्वप्राप्तये देवतानिमित्तेन क्रियमाणं, देवतायै एव च समर्प्यमाणं यत्किमपि कर्म, आन्तरं बाह्यं वा, यज्ञ एव। यज्ञरूपस्य ईदृशकर्मणः कर्ता 'पुरुषः' जीवः, एव यजमानः गृहस्वामी वा, जीवस्य प्रकृतिरेव गृहपत्नी यजमानस्य सहधर्मिणी वा। यद्वा, यथा नारायणोपनिषदि ८० तम सन्दर्भे प्रोक्तं, श्रद्धा एव यजमानपत्नी—'तस्यैव विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी।' कस्तर्हि पुरोहितः? न खलु जीवः, तस्याहंकारचालितत्वात्, देहप्राणमनसां बन्धनैर्निगडितत्वाच्च। सति तु तस्य पौरोहित्ये महाऽनर्थसम्भावना। अत अन्तरस्थदेवताया आह्वानं कृत्वा पौरोहित्येन होतृत्वेन च तस्याः प्रतिष्ठापनं कर्तव्यमन्तर्वेदौ—'उर एव वेदिः,' छान्दोग्योप० (५।१८।२)। भागवतसङ्कल्परूपाऽन्तः स्थिता सा देवता यदि न जागर्ति अन्तरे, तर्हि कोऽपि जीवं त्रातुं तारयितुं च न समर्थः, यतोऽसौ देवतैव यज्ञस्य सिद्धिदाता पुरोहितः। परमदेवतायाः पुरोहितात्मकस्वरूपमेव 'अग्नि' शब्देन निगद्यते वेदे।

अथ काः खलु समिधः? ईश्वरोन्मुखानि अन्तर्यज्ञाय सिद्धानि च देहप्राणमनांसि अन्यानि चास्मत्सत्ताया अङ्गोपाङ्गान्येव समिधः। मनसो बुद्धेर्वा निर्मलता प्रकाशयुक्तावस्था च घृतम्। देहप्राणमनसां नानाविधावस्था सत्यस्यान्वेषणार्थमभिव्यञ्जनार्थं वा क्रियमाणानि कर्माणि सकलान्यपि पूर्णोत्सर्गार्थमुपयुक्तानि हव्यानि[1]। ज्योतिश्शक्तिसत्यानन्दाऽमृतत्वप्राप्तिरेव हविष्प्रदानस्य फलं यदुपरिष्टादुपन्यस्तमस्माभिः सविस्तरम्।

स्पष्टमेवैतेन यत् अन्तर्यज्ञस्य सर्वाण्यपि अङ्गोपाङ्गानि अस्मास्वन्तरेव सन्ति। मनुष्ये अन्तरेवास्ति अग्निः, अन्तरेव वेदिर्हविर्होता च। अभ्यन्तरे एवास्ति ऋषिर्मन्त्रो देवता च, अन्तरेव प्रधानपुरोहितस्य ब्रह्मणो वेदगानम्, अन्तरेव च ब्रह्मद्वेषिराक्षसाः, देवद्वेषिदैत्याश्च। अन्तरेव वृत्रो वृत्रहन्ता च, अन्तरेव च देवदानवयुद्धम्। अन्तरेव वशिष्ठः, विश्वामित्रः, अङ्गिराः, अत्रिः भृगुः, अथर्वसुदासत्रसदस्यु-प्रभृतयश्च ऋषयः, अन्तरेव च पञ्चविधाः ब्रह्मान्वेषिण आर्यगणाः।

तदेवम् अग्नेराध्यात्मिकस्वरूपम् अस्माभिर्निरूपितम्। अयमग्निरेव यज्ञस्य पुरोहितः यं मनुष्यः निजाध्यात्मिकप्रतिनिधिरूपेण पुरो निधत्ते, पुरो धीयमानत्वादेवायं पुरोहितः प्रोच्यते—पुरः पुरस्तात्, अग्रे हितः स्थापितः इति कृत्वा। अयमाहुतिद्रव्याणि अर्थात् देहप्राणमनःप्रभृतीनि अस्मत्सत्तायाः सर्वाण्यङ्गानि तेषां कार्याणि च परिशोधयति, अर्पयति च देवान् यज्ञे आहूतान् प्रति। देवानाम् आह्वानात्, आह्वान-पूर्वकं होमनिष्पादनाच्च अयं 'होता' इत्युच्यते; ऋत्वनुसारम् अर्थात् स्वकार्याणां यथायथविध्यनुसारं, तेषां समुचित-ऋत्वनुरूपं च यजनात् स ऋत्विगुच्यते,—

---

१. विस्तारार्थम् On the Veda ग्रन्थस्य चतुर्थाध्यायः "The foundations of the Psychological theory" शीर्षकोपेतो द्रष्टव्यः।

ऋतुम् अर्थात् ऋतस्य सत्यस्य विधिं कालञ्च, अनु यजतीति ऋत्विग् । अन्तर्यज्ञस्य योगस्य च ससाधकत्वात् स 'साधु' इत्युच्यते (साधयतीति साधु) । स देवानां दूतो योऽग्रणीरिव नः पुरो गच्छन् नयत्यस्मान् देवानां धामानि । स मुख देवानाम् । मुखत्वादेव स प्रमुखता भजते प्रथमश्च दृश्यते सर्वदेवेषु, अन्ये देवास्तावत् परस्यैकस्याङ्गभूता, परस्तात् स्थिता, अग्निमुखेनैव प्राप्यन्ते । स देवानामास्यम् । अस्माभिरर्प्यमाण सर्वं प्रथमत तस्यैव आस्ये हूयते, तन्मुखेनैव देवास्तत् स्वीकुर्वते, तेनैव तत्तद्देवाय तत्तद्भाग. प्रदीयते । एवञ्च स साक्षात् सर्वदेवप्रतिनिधिनया अस्मद्हृदयगुहायामवस्थित ।

अयमग्नि मर्त्य - ज्योतिरमृतत्वप्राप्तये सङ्ग्रामपरायणस्य आर्यस्य महाकर्मणः कर्ता, भूलोकद्युलोकयो शुद्ध उदात्तश्च मध्यस्थ । अनासक्तो निस्तन्द्रोऽविजेयोऽय दिव्यसङ्कल्पाग्नि सर्वभूतेष्ववस्थितो वैश्वानर इव विश्वस्मिन् विश्वेऽविरत क्रियापर । विश्वेषु नरेषु विद्यमानः, विश्वेषां नराणां हितश्चाय वैश्वानरोऽग्निः देवेषु महत्तम., शक्तिमत्तमः, तेजस्वितमो निर्व्यक्तिकतमश्च ।

अग्नेर्यदेतन्महामहिममयमाध्यात्मिक स्वरूपमस्माभिरुपवर्णितम् तत् स्वयं भगवतो वेदस्यैव मन्त्रवर्णे —

'अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः ।
देवो देवेभिरागमत् ॥'　　ऋ० १।१।५॥

'　　गोपामृतस्य दीदिविम ।
वर्धमान स्वे दमे ॥'

ऋ० १।१।८॥

ऋतजात ' ऋ० १।१४४।७॥
हृदि क्रतुम न्' ऋ० ४।४१।१॥

इत्यादिभि स्पष्टीभवति । ईदृशेषु मन्त्रेषु अग्नि 'कविक्रतु' अर्थात् कर्मसु अवस्थित द्रष्टृसङ्कल्प, सर्वद्रष्टृसङ्कल्पशक्तिरूप', सत्यमय, सत्यस्वरूप, चित्रविचित्रान्त श्रवणैश्वर्यसम्पन्न अर्थात् नानाविधान्त प्रेरणानां महाधनी चाम्नात । सत्यम्, आनन्त्य, विशाला वैश्वप्रज्ञा-शक्तोरविच्छिन्ना, ज्ञानशक्त्यो समवायभूता प्रज्ञा–च तस्य निजधाम, 'स्वे दमे ।'

कविक्रतु, सत्य, चित्रश्रवस्तम इत्यादीनि अग्ने विशेषणानि अस्मिन् भागवतसङ्कल्पशक्तिभूते आध्यात्मिकेऽग्नौ यथा सङ्गच्छन्ते न तथाऽऽधिभौतिके आधिदैविके वाऽग्नौ इति सम्यगवधेयं सुधीभिः ।

तदिदमग्ने स्वरूपं गुणकर्मस्वभावादिकञ्च मनसि निधाय आग्नेयसूक्तानां श्रीअरविन्दकृताम् व्याख्यां परिशीलयन्तः पाठकाः अपूर्वमालोक परं प्रमोदञ्च प्राप्स्यन्तीति न पूर्णः प्रत्यय इत्यलमतिपल्लवितेन ।

(गतमासाङ्कतोऽग्रे)

संस्कृतभाषायाः पत्रकारिताक्रमविकाशः

(ले० विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्)

अथ संस्कृतभाषाया मासिकपत्राण्यपि च बहूनि देशेऽत्र यत्र तत्र सर्वत्र प्रकाश्यमाणानि दरीदृश्यन्ते। तेषु किल उद्यानपत्रिका तिरुपतितः (आन्ध्रप्रदेशात्) प्रकाशते। अथ गुरुकुल-कांगड़ी विश्व-विद्यालय,हरिद्वारात् गुरुकुलपत्रिका ऽऽविर्भवति। 'जयतु संस्कृतम्' इत्याख्या पत्रिका १०।५५८ भोटाहिटी, काठमाडूनः (नेपाल) प्रादुर्भवति। अत्रस्थितिवास मुंगर (बिहार) इति स्थानत देववाणी पत्रिका प्राकाश्य याति। आनन्द-लॉज, जाखू, शिमला—१ स्थानात्—आचार्यश्रीदिवाकरदत्तशर्ममहाभागाना प्रधान-सम्पादकत्वे तथा च कविरत्न श्रीकेशवशर्मशास्त्रि-महोदयानाम् प्रबन्धसम्पादकत्वे दिव्यज्योतिः इति पत्रिका प्राकट्यमेति। श्रीसीताराम--वैदिक-महाविद्यालय, ७।३ पी० डब्लू० डी० रोड, कलकत्ता ३५ इति स्थानात प्रणवपारिजात इत्याख्यं मासपत्रं प्रकाशते। कालिकातातः मञ्जूषा नाम्नी मासिकपत्रिकापि प्राकाश्य व्रजति। बालसंस्कृतम् इति नाम मासपत्र, आगरारोड, घाटकोपर, बम्बई-७७ इति स्थानतः प्रकाशते। खुरजा, जिला बुलन्दशहरतः विज्ञान-ज्योति इति पत्रम् प्राकाश्यं व्रजति। आदौ स्व. म.म. गिरिधरशर्मचतुर्वेदमहाभागानां तथा च स्व. कविशिरोमणिदेवर्षिभट्ट पं० मथुरानाथ-शास्त्रि साहित्याचार्यवर्याणामेवमेवान्यान्यजय-पुरीयविद्वत्तल्लजानां, तथा ऽधुनाऽऽशुकविविद्वद्वर-श्रीहरिशास्त्रिदाधीच महोदयानां सम्पादकत्वे, श्रीदीनानाथ 'मधुप'—महाभागानां सहसम्पादकत्वे तथा च प० श्रीगिरिराजशर्मशास्त्रिवर्याणां प्रबन्ध-सम्पादकत्वे भारती-भवन, गोपाल जी का रास्ता, जयपुर (राज०) इति स्थानाद् भारती नाम्नी मासिकी पत्रिका प्रकाशते। अथ मालवमयूर इति मासिकम् पत्र मध्यभारतप्रदेशे मन्दसौर-स्थानत पण्डित श्रीरुद्रदेवत्रिपाठिमहाभागानां सम्पादकत्वे तथा श्री जयदेवत्रिपाठिमहोदयस्य सह-सम्पादकत्वे च प्राकाश्य व्रजति। वैदिकमनोहरा नाम्नी पत्रिका, काञ्जीवरम् (मद्रास) इति स्थानत प्रकाशते। अथ पद्मभूषणमहामहोपाध्याय-पण्डितप्रवरदत्तोवामनपोतदारमहोदयै संरक्षिता तथा श्रीवसन्तानन्तगाडगिलमहाभागैर सम्पादिता, लोककल्याण, ७७, शनिवारपेठ, पूना-२ इति स्थानात् प्रकाश्यमाणा शारदा नाम्नी पत्रिका मासिकी प्राकाश्यमेति। संस्कृतसाहित्यपरि-षत्पत्रिका इति विख्याता मासिकपत्रिका १६८।१ राजाधनेन्द्रस्ट्रीट, श्यामबाजार, कलकत्ता-स्थानात् प्रकाश्यते। अथादौ स्व. कविशिरोमणि-भट्टमथुरानाथशास्त्रिसाहित्याचार्यवर्यैः सम्पादिता तथा च स्व. म. म. प० गिरिधरशर्मचतुर्वेद-महाभागादिभिः संरक्षितश्च जयपुरात् सुचिरं प्रकाशितस्तथा पुनर्वाराणसीत सर्वतन्त्रस्वतन्त्राणां प० महादेवशर्मणां कवितार्किकचक्रवर्तिनां प्रधान-सम्पादकत्वे तथा श्रीरघुराजमिश्रन्यायाचार्याणां सहसम्पादकत्वे, ततः पुनर्जयपुरतः स्व. पं० वृद्धिचन्द्रशर्मशास्त्रिव्याकरणधर्मशास्त्राचार्याणां सम्पादकत्वे, तदन्वखिलभारतीयसंस्कृतसाहित्य-सम्मेलनस्य, देहल्यां सुप्रतिष्ठितस्य तत्त्वावधाने प्रकाश्यमाणः संस्कृतरत्नाकर इति पत्रं मासिक को वा न जानीते संस्कृतपण्डितस्तत्पत्रपाठकश्च ? पत्रस्यास्य सम्पादन कंचित्कालं महामहोपाध्याय-पण्डितवर्यपरमेश्वरानन्दशास्त्रिमहाभागैस्तथा सुचिरं

स्व. केदारनाथसारस्वतमहोदयैरपि कृतमभूत्। स च रत्नाकरोऽधुनाऽखिलभारतीयसंस्कृतसाहित्यसम्मेलनन्, देहली–६ इति प्रधानमन्त्रिभिर्द्राक्तरवर्यमंण्डनमिश्रमहाभागैः एम.ए, पी-एच. डी., मीमांसाचार्यैः अ. भा. सस्कृतसाहित्यसम्मेलनस्य मुखपत्ररूपेण सम्पाद्यमान. प्रकाश्यमाणश्च वर्तते। अथ श्रीभारतधर्ममहामण्डलस्य, काशिकस्य तत्त्वावधाने त्यक्तमहामहोपाध्यायपदवीकैः पञ्चाननतर्करत्नभट्टाचार्यैस्तया श्रीमदवधेशप्रसादशर्मद्विवेदिमहोदयै सहकारिसम्पादकैश्चसम्पाद्यमानः सूर्योदयः नाम मासिकपत्र संस्कृतज्ञकुलसदस्यानां सुपरिचितमेव। विहारसंस्कृतसञ्जीवनसमाजः, वारीपथ, पटना–४ इत्येतस्मात्स्थानात् संस्कृतसञ्जीवनम् इत्याख्यं मासिकपत्रमपि प्राकाश्यं प्रयाति। अथ च स्व. बुर्लोश्रीनिवासाचार्यवर्यैः सस्थापिता तथा संस्कृतसाहित्यरत्नैः पण्डितप्रवरैः श्रीगलगलीरामाचार्यवर्यैः प्रधानसम्पादकैस्तथा च सस्कृतसाहित्यसुधाकरैः पण्डितश्रीगलगलीपण्ढरीनाथाचार्यमहाभागैः सहसम्पादकैश्च सम्पादिता मधुरवाणी नाम्नी पत्रिका, गदग (कर्णाटक) स्थानत आविर्भवन्ती विद्यते। श्रीगोविन्दप्रसादशास्त्रिदाधीचमहाशयैः सम्पादिता तथा श्रीबाबूलालजैनद्वारा प्रकाशिता, खण्डेलाहाउस, कल्याण जी का रास्ता, चांदपोलबाजार, जयपुरतः प्राकाश्यं व्रजन्ती कल्याणी नामिका मासिकी पत्रिकापि च प्रकाशते। संस्कृतभाषाया मासिकपत्राणां सैषा महती संख्या खल्वाशाप्रदास्ते नाम नूनम्।

एभ्योऽतिरिक्तं संस्कृतभाषाया मासिकपत्रेभ्यः संस्कृतसभायाः पुण्यपुरस्थाया भारतवाणी इत्याख्या पाक्षिकी पत्रिकापि प्रादुर्भवति। अस्याः पत्रिकायाः प्रधानसम्पादका द्राक्तरवर्याः श्री व. ग. राहूरकरमहाभागास्तथा कार्यकारिसम्पादका. प्राध्यापका श्रीद्राक्तर ग श्री. वारे वेदान्तशास्त्रिणश्च वर्तन्ते। अस्याः पत्रिकायाः सम्पादकमण्डले प्राध्यापका वि भा. देवमहाशया, द्राक्तरा म. त्र्यं. सहस्रबुद्धे, द्राक्तरा व त्र्यं. झांबरे तथा च द्राक्तरवर्या ग. बा. पलसुले इत्येते महानुभावाः सदस्या विद्यन्ते। अयोध्यापुरीतः संस्कृतसाकेतः इत्याख्य पाक्षिक पत्र प्रादुर्भवदास्ते।

अथ संस्कृतम् नाम साप्ताहिकं पत्रम्, संस्कृतकार्यालय, अयोध्यातः प्रचरति। संस्कृतप्रचारिणी सभा, नागपुरतः संस्कृतभवितव्यम् इत्याख्यं साप्ताहिक पत्रमपि चाविर्भवति।

सस्कृतभाषाया दैनिकं पत्र केवलमेकमेव प्रकाशते। तच्च संस्कृतिः इत्याख्यं वर्तते। तदिदं पत्रं श्रीमद्बालाचार्यवरखेडकरमहाभागाना सम्पादकत्वे, डेक्कनकॉलेज, पूना–६ इत्यस्मात् स्थानात् प्रकाशते।

अथ चैताभ्यः पत्रपत्रिकाभ्योऽतिरिक्ताश्चापि काश्चन प्रकाश्यमाणाः स्युरिति सम्भवति, परं तासामपरिचितत्वात्तन्नामादीनामत्रोल्लेखमकुर्वाणो जनोऽसौ पङ्क्तीनामासां लेखकः स्वस्याज्ञानाय सर्वेभ्यः सम्पादकबन्धुभ्य. सप्रश्रयं क्षमां याचमानोऽस्ति।

एतासां किलोपर्युक्तानां संस्कृतपत्रपत्रिकानामस्तित्व तावत् संस्कृतपत्रकारितायाः सजीवं प्रत्यक्षं च प्रमाणमास्ते। धन्यास्ते महान्तो विद्वज्जना महामनसो महाप्राणा महात्मानश्च यैः प्रतिकूलेऽपि च देशे काले भूयांसि कष्टानि क्लेशांश्च विषह्य कथमपि पत्राणि नानाविधानि सम्पाद्य प्रकाश्य च विदेशीयैः स्वदेशीयैश्च कृतं 'संस्कृतभाषा मृतभाषा' इति परीवादमपोह्य ताभि-

माम् सुरभारतीं जीवन्तीं प्रमाण्यादत्वे संस्कृत-पत्रकारितायाः प्ररोहाङ्कुरः सुरक्षितोऽस्ति । वय सर्वे संस्कृतहितैषिणस्तान् प्रति कृतज्ञाः स्मः । तेभ्यो हार्दान् धन्यवादांश्च वच्मः ।

यदीदानीं वयं संस्कृतपत्रकारिताम् समुन्नेतु वाञ्छामस्तदा सौभाग्यात् पृष्ठभूमिस्तु सुतरां सुपरिष्कृतास्ते । एतदपि च मन्तव्यं भवेद्धि सदा संस्कृतभाषायाः पत्रकारिता सद्योऽङ्कुरिता स्वशैशवकाल एव वर्तमानास्तीति । यतोऽधुनातने विश्वस्मिन् 'पत्रकारिता'-शब्दाद् यो हि पुरुषार्थो, राष्ट्रसेवा, समाजसेवा, मानवसेवा, ज्ञानविज्ञानोपासना, साहित्यसेवाप्रभृतयो ये येऽर्थाः परिगृह्यन्ते पत्रकारैः समर्थ्यन्ते सर्वेऽधुनावधि संस्कृतभाषाया पत्रकारितोद्योगे गम्भीरया, व्यापकया, परमार्थया च दृष्ट्या नैवान्तर्भूता भवन्तीति स्वीकरणमुचितं स्यात् । पत्रकारिता नाम केवल पत्राणां सम्पादनमात्रमेव नास्ते । केवलं पत्रसम्पादनं तु साहित्य-सेवा, समाज-सेवा किं वा विद्याकलानामाराधनमात्रमेव भवितुमर्हति । वस्तुतः पत्रकारिताया नानाहेतवो, बहूनि प्रयोजनानि, अनेकान्युद्देश्यानि च वर्तन्ते खलु । अतो नात्र केवल केषाञ्चन साहित्यिकानां वा समाजसङ्घटनाय प्रवृत्तानां पत्राणां सम्पादनमात्रमेव पत्रकारिता मन्तव्या, वरञ्च पत्रकारितायाः सुविस्तृतो व्यापको गम्भीरश्चार्थो गृहीतव्योऽस्माभिः । संस्कृतसाहित्ये ज्ञानविज्ञानभासुरेऽतिव्यापके विस्तृतेऽपि सति न तत्र पत्रकारेभ्यः पथः प्रदर्शनोपयुक्ता कापि 'पत्रकारसंहिता' समुपलभ्यते । सत्यमेव हि पत्रकारत्वं विकाशमानस्यास्य विश्वस्य किमपि नवीनमद्यतनयुगीनं तत्त्वम् नवीना विद्या, नवं विज्ञानं, नव्या कला, नूत्नं शिल्पं, नवीनं शास्त्रं, नव्या सेवाप्रणाली च वर्ततेतमाम् । अतोऽत्र वयं पत्रकारिताया व्यापकमर्थं हृदयङ्गमं कर्तुं कानिचिदुद्धरणान्यवतार्य पत्रकारिताया व्यापकमर्थं स्पष्टीकर्तुं च प्रयतामहे । तथा हि—

"साधकस्य कृते साधनायाः, त्यागिनः कृते त्यागस्य, तपस्विनः कृते कष्टसहिष्णुतायाः, अनासक्तस्य कृतेऽनासक्तेः, योद्धुः कृते सङ्घर्षस्य रणस्य च, कवेः कृतेऽनुभूतीनामभिव्यक्तेः, कलाकारस्य कृते समूर्तेर्गूढानां रहस्यमयानां च चित्राणां चित्रणस्य, आलोचकस्य कृते जीवनस्य स्थूलसूक्ष्मधाराया विवेचनस्य, साहित्यिकस्य कृते लौकिकस्य यथार्थस्य भावुकस्य च जगतोऽभिव्यक्तेः पन्थानं युगपदेवोपस्थापयितुं पत्रकारितामृते को नु खलु समर्थोऽस्ति ?

"ज्ञानस्य, विज्ञानस्य, दर्शनस्य, साहित्यस्य, कलायाः, शिल्पस्य, राजनीतेरर्थनीतेः, समाजशास्त्रस्येतिहासस्य, सङ्घर्षस्य, क्रान्तेः, उत्थानस्य, पतनस्य, निर्माणस्य, विनाशस्य, प्रगतेर्दुर्गतेश्च तथा लघुमहतां सर्वेषां मानवजीवनस्य प्रवाहाणां, प्रतिबिम्बमापादने पत्रकारितेव कोऽन्यः सफलो भवितुमर्हति ? जीवनस्य, समाजस्य, संस्कृतेर्विश्वस्य चोत्कृष्टदर्पणत्वसाधने पत्रकारकलासदृशमन्नत्वेऽन्यत् किमास्ते ?

"अन्यायस्य प्रतिरोधकरणे, नवविचाराणां कल्पनानां च वाहनत्वे, नवरचनायाः सन्देशस्याग्रदूतत्वाङ्गीकरणे तथान्ततो जीवनसागरे प्रोत्तिष्ठमाणानामुल्लोलकल्लोलहिल्लोलानां, विप्लवोपप्लवानां च प्रतिनिधित्वोपढौकने ननु पत्रकारकलायाः सजीवप्रतिमारूपाण्यधुनातनानि पत्राणीव नान्यत् किमपि साधनान्तरं विद्यते ।"

—श्री कमलापतित्रिपाठी

अथ पत्रकारो न हि विद्वान् दार्शनिको वा वक्तुं युज्यते, कामं स शास्त्रज्ञो वा चिन्तको वा भवतु। पत्रकारः कविर्भवितुं नार्हति, यतस्तस्य मतिर्भावसाम्राज्ये स्वच्छन्द विहरणे भवति। पत्रकारो लेखकोऽपि न भवति, यतस्तस्य कर्मक्षेत्र लेखादिरचनापर्यन्तं परिसीमितं भवति। ग्रन्थकारः पत्रकारो न भवति, यस्मात्तस्य ग्रन्थप्रणयनमेव कार्यमास्ते। साहित्यिकपत्रपत्रिकाणां सम्पादकः पत्रकारो नोच्यते, स खलु सम्पादको वा साहित्यकारो वा केवलं स्यात्। एवमेवाभिनेता, नाट्यकारः, संगीतज्ञश्चित्रकारोऽपि पत्रकारो भवितु नार्हति। परन्त्वेतेषां सर्वेषामेव गुणानामेकत्र हृदि धारको बहुश्रुतो राजनीतिज्ञो नेतृत्वगुणसम्पन्नो जागरूको जगद्गतिव्यापारान्निपुणं जानानो, घटनान्तराणां वेत्ता, संसारस्य सर्वाण्यपि परिवर्तनानि विपरिवर्तनानि च जानानो नानाविद्यासु कलाकलापेषु च व्युत्पन्नो भवति पत्रकारः। ततः सेयं पत्रकारिता किमपि विचित्रमेव प्रतिभानवत्त्वमपेक्षते।

सेयं पत्रकारिता स्वात्मनि परश्शतान् समुत्कर्षान् धत्ते। मुख्यतः पत्रकारो मानवतायाः, समाजस्य, राष्ट्रस्य, साहित्यस्य, विद्यायाः, कलानां, ज्ञानस्य, विज्ञानस्य, शिक्षायाः, संस्कृतेः, सभ्यतायाः, नैतिकतायाः, धर्मस्य चोन्नायकोऽपि विनम्रो भवति मूकसेवकः। स मर्यादामनुपालयन्नपि सर्वतन्त्रस्वतन्त्रं चेष्टते। क्रान्तदर्शी चापि स्वाधीनदृशा पश्यति विश्वप्रपञ्चं निखिलम्। क्रान्तिकारोऽपि सः प्रशांतचेता धैर्यधनो, भावुकोऽपि यथार्थवादी, निर्भीकोऽथ कर्त्तव्यनिष्ठुरो भवति पत्रकारः।

पत्रकारः स्वकार्योपयोगिनां तत्तत्स्थानां सर्वदि सार सार सङ्गृह्णीते। स खलु मानसिकीं सतर्कतां, समयानुसारिणी वृत्ति, सूक्ष्मां निरीक्षणशक्ति, बुद्धिप्रभावाद्घटनान्तराणामन्तस्तत्त्वज्ञतां, सहनशीलतां, साहसप्रियतां, सावधानतां, निष्पक्षतां, मौलिकतां, कल्पनाप्रवणतां, निर्लिप्ततां, निर्भीकतां च दधानो भवति। पत्रकारस्य सर्वश्रेष्ठो गुणो जगज्जीवन प्रति सम्वदनशीलता वर्वर्ति।

संसारेऽस्मिंस्तादृशो नास्ति कोऽपि विषयो, नास्ति कोऽपि प्रश्नो, नास्ति कापि समस्या, या पत्रकारस्य कर्मक्षेत्रसीमान्तर्नायाति। समयानुरोधात् परिस्थित्यनुसारं पत्रकारो जनहिताय वाक्कीलत्व, नेतृत्वं, सैनिकत्वं, शिक्षकत्व, दार्शनिकतां, वैज्ञानिकत्वं, साहित्यिकताम्, भाष्यकारत्वं, शास्त्रज्ञतामालोचकत्व, व्यावसायिकतां, राजनीतिज्ञतां, कलाकारत्वमुपदेष्टृत्वमाचार्यत्वं सर्वमपि चाङ्गीकुरुते। एवं कुर्वाणोऽपि पत्रकारोऽन्ततः सर्वथा कूटस्थो मौलिकश्च भवति। स खल्वान्दोलयन्नपि जनमनोवृत्तीः, स्वयं निष्पन्दोऽविचलवृत्तिः स्थितप्रज्ञतामात्मनो द्रढयति।

निवेदनस्याशयोऽयं यद्धि पत्रकारो नाम कश्चन विलक्षणो विचित्रश्च व्यक्तिविशेषो भवति। पत्रकारस्य व्यक्तित्वं किमप्यन्यादृशमेव वर्तते। विद्वांसस्तु सर्वमेतज्जानते, परं पाठकेभ्यो वयमेतद्वक्तुमुत्सहामहे विशेषतः संस्कृतपत्रकारिताभिलाषुकेभ्यो, यत् सैषा पत्रकारिता स्वात्मसंयमं, स्वात्मशिक्षणं, स्वात्मानुशासनं, स्वात्मविकासचेष्टां, प्रबलां कामपि महत्त्वाकाङ्क्षां, सेवाभावं चापेक्षते।

(शेषागामिन्यङ्के)

"स्कन्दस्वामी, तदीयप्रथमाष्टकमितमृग्वेदभाष्यञ्च"

(डा० मञ्जुलमयङ्कपञ्जुलः, वेदव्याकरणाध्यापकः विश्वभारती शान्तिनिकेतनम्)

गुञ्जतु मञ्जु सु-भाव कुञ्जमविकलम् ,
कोकिलकलेव स-कला संगिनी मे ।
ह्लादतां हृदिवमा सरलालसारसलसा,
कामला कोमला सोमला श्यामला मे ।।

प्रथितयशसो विश्रुतकीर्त्ते, ऋग्वेदभाष्यकर्त्तुः सायणाचार्यस्यैव अद्यावधि नामपरिचयात्, न ततोऽपि अन्य प्राक्तनः कश्चन ऋग्वेदभाष्यकार इत्यस्माभि प्रतीयते स्म । किन्तु सायणाचार्यस्य ऋग्वेदभाष्ये, स्कन्दस्वामिन. १नामभाष्ययोश्चासकृदुद्धरणात्, अधिगच्छामः स्कन्दस्वामिनः प्राक्तनत्वं सायणाचार्यादपि ।

नानार्थार्णवसंक्षेपे, ईस्वीयाब्दत्रयोदशशतकपूर्वार्द्धजीविना २केशवस्वामिनाऽपि स्मर्यमाणः स्कन्दस्वामी, निघण्टुटीकायाञ्च, त्रयोदशशतकजीविना ३देवराजयज्वनापि उल्लिख्यमानः, अतिपुरातनोऽसौ कश्चनाचार्य इति सम्यक परिपोष्यते । संप्रति तु लेशतो विशेषतो वा तदीयं भाष्यं मुद्रितामुद्रितमुभयरूपमेव लभ्यते । अद्यावधि समुपलब्धेषु स्कन्दस्वाम्यृग्वेदभाष्यहस्तलेखेषु, सर्वाङ्गसंपूर्णं भाष्यं प्रथमाष्टकमात्रमेव लभ्यते । द्वितीयतृतीयचतुर्थपञ्चमाष्टकानाञ्च भाष्याणि अंशत एवोपलभ्यन्ते । षष्टमण्डलस्थपञ्चसप्ततितमसूक्तस्य, आषड्ऋचमेव भाष्यमुपलभ्यते । भाष्यस्य च हस्तलेखाः, मद्रासनगरस्य राजकीये ग्रन्थागारे, त्रिवेन्द्रमाख्यनगरास्थाद्यम् विश्वविद्यालये च सुरक्षिताः४ सन्ति ।

एतस्मिंश्च प्रबन्धेऽस्माभिः, स्कन्दस्वामिनः ऋग्भाष्यत्वेन अद्यावधि मुद्रितानि संस्करणान्येवाभिमतानि, न चामुद्रितानि अप्रकाशितानि वा स्कन्दस्वामिनो नाम्नि उपलभ्यमानानि भाष्याणि । तद्यथा साम्बशिवशास्त्रिणा "ऋक्संहिते"ति नाम्ना प्रकाशितं प्रथमद्वितीयाध्यायमात्रविमर्शात्मकम्, सी० के० राजणे मद्रासविश्वविद्यालयात् प्रकाशितं स्कन्दस्वामिकृतम् वेदभाष्यमिति द्वितीयम्, एल० ए० रविवर्मणा च ऋक्संहितेति नाम्ना प्रकाशितं त्रयस्त्रिंशत्तमाध्यायादारभ्य षड्चत्वारिंशत्तमाध्यायमात्रकमिति तृतीयं संस्करणम् । एतान्येव त्रीणि मुद्रितसंस्करणानि आश्रित्यास्माभिः स्कन्दस्वामिऋग्भाष्यस्योपपरीक्षणमनुशीलनञ्च कृतम् । एतेषां

---

१ (अ) वराहून् परशब्दोपपदादाङ्पूर्वात् हन्तेर्वा, हरतेर्वा ह्वयतेर्वा जुहोतेरदानार्थाद्वा "हु" इत्येतस्य निष्पत्तिरिति स्कन्दस्वामी ।
सायणाचार्यऋग्वेदभाष्यम् अ० ६, वर्गः १४, ऋक् ५

(इ) द्विनञ् पूर्वस्यासुन्प्रत्ययान्तस्य वेदेरेकस्य नञो लोपः, अन्यस्य प्रकृतिभावश्च स्कन्दस्वामिना निपातितः । पाणिनिना तु नभ्राण्नपादिति सूत्रे न वेत्तीत्यस्मिन्नर्थे निपातितः । अस्यार्थस्यानुपपन्नत्वात् स्कन्दस्वामिपक्ष एवाश्रीयते ।
सायणाचार्य ऋग्वेदभाष्यम्, अ ४,अ. १, वर्गः ४, ऋक् ३.
उभेऽप्युद्धरणे, साम्बशिवशास्त्रिणा संपादितया ऋक् संहितया गृहीते ।

२. द्वयोस्त्वश्वे तथा ह्याह स्कन्दस्वाम्यृक्षु भूरिशः
माधवाचार्यसूरिश्च को अद्येत्यृचि भाषते ।
संचिका १, पृ. २, श्लोक सं० ६

(साम्बशिवशास्त्रिणः "ऋक्संहितया" गृहीतः)

३. कर्मनामानि उत्तराणि इति भाष्ये स्कन्दस्वामी। देवराजयज्वा । निघण्टुटीका

४. प्रो० भगवद्दत्तः — वैदिक वाङ्मय का इतिहास, प्रथम भाग, द्वितीय खण्ड, पृ. १८

सर्वेषामपि सस्करणानां परिधिः प्रथमाष्टकमेव, अतो हेतोः "स्कन्दस्वामी, तदीयप्रथमाष्टकमितमृग्वेदभाष्यञ्चेति" नामकरणं कृतम् एतैः समन्वयेन च संभाव्यमानस्यैकस्य प्रथमाष्टकमितऋग्भाष्यस्य कल्पनमपि कृतम् ।

गवेषणा प्रवृत्तिः

सायणाचार्यस्य ऋग्वेदभाष्यमधीयानेन मया स्कन्दस्वामिन ऋग्वेदभाष्यस्याप्यवसरो लब्धः तथा चोभयोरपि तुलनया न केवलं भूयांसोऽर्थभेदा एव निरीक्षिता अपितु अन्येऽपि बहवो भेदाः निरीक्षिताः । उदाहरणार्थं, हस्कार (ऋ० वे० १।२३।१८) इति पदस्य, सायणाचार्येण हस्कारात् दीप्तिकरात् इत्यर्थः प्रदर्शितः । किन्तु स्कन्दस्वामिना "आर्यस्य पुंसः, हशब्दोच्चारणं हस्कारः" इत्ययमर्थः प्रदर्शितः । समासेन अस्या ऋचः स्कन्दानुरोध्यर्थः "यथा दिवादर्निमित्तम्, आर्तिप्रतिपत्त्यर्थम् हशब्दमुच्चारयामः तथा कुर्वन्तु मरुतः" इति, सायणानुरोध्यर्थश्च "दीप्तिकरात् विशेषेणदीप्यमानात् अन्तरिक्षात् स्वत उत्पन्नाः मरुतः अस्मान् सुखयन्तु" इति च भवेत् । अत्र मंत्रार्थाभिध्यक्ता, सुखविषयिणीच्छा यद्यपि उभयोरपि भाष्यकारयोः अर्थप्रक्रियायां समाना तथापि हस्कारपदस्य को वास्तविकोऽर्थः इत्येव सन्देहो नैवापाकर्तुं शक्यते उभयोरपि भाष्यकारयोः मंत्रार्थप्रक्रियया । हस्शब्दः, सायणेन, "हसे हसने" इति धातोः व्युत्पादितः;यावत्स्कन्दस्वामिना अव्युत्पादितः हस्शब्दः अव्यक्तशब्दत्वेन गृहीतः । तथैव चित्रश्रवस्तमः (ऋ० वे० १।१।५) शब्दे "श्रवःपदस्य सायणाचार्येण व्याकरणप्रक्रियया "श्रूयते इति श्रवः कीर्त्तिः" इत्यर्थः कृतः ततश्च चित्रश्रवस्तमः शब्दस्यातिशयेन विविधकीर्त्तियुक्तः इत्यर्थः प्रदर्शितः । किन्तु स्कन्दस्वामिना प्राक् "श्रव." पदस्य समेऽपि संभावितार्था. विवृत्य व्याख्याताः । यथा, श्रवइत्यन्ननाम वा धननाम वा कीर्त्तिपर्यायो वा इति । ततश्च अतिशयेन पूज्यं विचित्रं वा, अन्नादीनामन्यतमं वा यस्य स चित्रश्रवस्तम इत्यर्थः कृतः । एवमेव शमं वृषभम् (ऋ० वे० १।३३।१५) इति ऋचो व्याख्याने वृषभपदेन, सायणः, गुणै. श्रेष्टम् इति, स्कन्दस्वामी च वृषभं नामानं कमपि राजानमवधारितवान् । अथ च ध्वसन्तिपुरुषन्तिभ्यामिति द्वाभ्यां पदाभ्यां स्कन्दस्वामी, "उपहास्कुशले वेश्ये" इत्यभिधाय अश्विनो वेश्यागामितामपि सूचितवान् यावत् सायणाचार्य. ध्वसन्तिपुरुषन्तिनामानौ कौचित् राजानौ इति संभावितवान् । नं चैतावतैवालम्, स्कन्दभाष्ये पदे पदे व्यत्ययान्, अभिमतार्थसिद्धये निगमान्तराणामुद्धरणानि, सूत्रोल्लेखादृतेऽपि बहुसंख्यान् इतिहासांश्च वीक्ष्य महत्कौतूहलमुपजायते । यद्यपि सायणभाष्येऽपि व्यत्ययाः, निगमान्तराणि, इतिहासाश्च लभ्यन्ते, तथापि नेयता प्राचुर्येण यथा स्कन्दभाष्ये । बहुषु मंत्रेषु, उभयोरपि प्रक्रियासाम्यमपि लभ्यते किन्तु आन्तर्यं विरोधश्च भूयान् । क्वचित् प्रक्रियासाम्येऽपि अर्थविरोधः, क्वचिच्चार्थसाम्येऽपि प्रक्रियाविरोधः, क्वचिच्च देवताविरोधः, क्वचिच्च प्रकरणविरोधः, क्वचिच्च. व्याकरणोपयोगे विरोधो दृश्यते ।

एवमेव [redacted]स्वामिना येषु स्थलेषु व्यत्ययस्योपयोगो विधीयते, सायणभाष्ये तेषु स्थलेषु व्यत्ययो नास्ति । स्कन्दभाष्ये यत्र चेतिहासाः सन्ति, तत्रैव सायणभाष्ये नोपलभ्यन्ते–इतिहासाः ।

सत्स्वपि एकेषुचित् इतिहासेषु, उभयोरपि प्रदर्शनस्थले भेदो दृश्यते । स्कन्दस्वामिना च यासु ऋक्षु निगमान्तराणि प्रदर्शितानि, तास्वेव ऋक्षु सायणभाष्ये निगमान्तराणां संकेतोऽपि न श्रूयते । ऋचामन्वयेऽपि असादृश्यम्, असाधारण्य च लक्ष्यते । तथा च क्वचित् पादयोजनायां, क्वचित् वाक्ययोजनायां, क्वचिदुपसर्गयोजनायां, क्वचिच्च क्रियायोजनायां, क्वचिच्च विशेष्यविशेषणसम्बन्धयोजनायाञ्च बाहुल्येन भेदाः दृश्यन्ते ।

स्कन्दभाष्ये कानिचिदेव स्थलानि विहाय, अन्यत्र सर्वत्र निपाताः पदपूरणार्थका एव गृहीताः, यावत् सायणभाष्ये, निपाताः प्रायः सर्वत्रैव सार्थकाः अपवादरूपेण चैकेषुचिदेव स्थलेषु पदपूरणत्वेन गृहीता दृश्यन्ते ।

स्कन्दभाष्ये च पदकाराणां, तत्कृतावग्रहाणां, यास्कस्य, यास्कनिर्द्धारितमंत्रदेवतानां च बहुशः मौलिकं प्रत्याख्यानमपि दृश्यते । यावत् सायणभाष्ये ईदृशी चर्चापि न श्रूयते । सुतरामुभयोरपि भाष्यकारयो. भाष्यपरीक्षया अर्थपार्थक्यम्, अर्थपार्थक्ये हेतुश्च, निरुक्तिव्युत्पत्तिव्याकरणादिप्रक्रियाभिः, सारल्येनोपपरीक्षितुं शक्यते । संप्रति च वेदार्थविज्ञाने बहुविधाः विप्रतिपत्तीः वीक्ष्य, अद्यावधि विज्ञातभाष्यकारेषु अतिपुरातनस्य स्कन्दस्वामिन ऋग्वेदभाष्यस्य, अध्ययनानुशीलने सर्वथैवोपयुज्येते इति गवेषणाप्रवृत्तिः ।

स्कन्दस्वामिनः कालविषयेऽपि विदुषां विप्रतिपत्तीः वीक्ष्य तत्कालोपपरीक्षणार्थं मदीयापि प्रवृत्तिः समवर्त्तत । पूर्ववर्त्तिषु विद्वत्सु, बहुभिः स्कन्दस्वामिनः ६३८ तमः पश्चादीस्वीयोवत्सरः, बहुभिश्च ११००तमः पश्चादीस्वीयोवत्सरः, स्वीक्रियते । किन्तु स्कन्दकालविनिर्णये न सर्वथाप्यनुमानमेव अपितु ऐतिहासिक तथ्यमपि अपेक्षते । मया चैतस्मिन्विषये ऐतिह्याधारमनुमानमप्याश्रितम् । अनुमानस्य चैतिह्याधारत्वात्, अनुमानसमर्थकानि प्रमाणान्यपि दत्तानि । स्कन्दस्वामिनश्च वलभीवास्तव्यत्वात् तत्कालव्यक्तित्वकर्तृत्वादिविनिर्णये वलभ्या इतिहासस्य महत्प्राधान्यम् । वलभ्या इतिहासश्चाधुनापि गवेषणीयो वर्त्तत इति सर्वेऽपि विद्वांस एकस्वर्येण वदन्ति । मया च किञ्चिदद्यावधिसमुपलब्धैतिह्यसामग्रीभिः, किञ्चिच्च स्कन्दभाष्योपलब्धसामग्रीभिः, तत्कालव्यक्तित्वकर्तृत्वप्रभृतिविषये चेष्टा व्यजृम्भत । तथापि मदीय एष आयासो गवेषणाकार्यं प्रवर्द्धयितुमेव न च मतवादस्य कस्यचित्प्रवर्त्तनार्थमिति मन्ये । भविष्यति, यदा वलभ्या. प्रमाणसम्मतमैतिह्यमधिकं प्रकाशमेष्यति, तदा स्कन्दस्वामिनो विषयं अपरमप्यधिक प्रत्ययार्हम् तथ्यमुपलप्स्यत इत्यस्माकं मतिः ।

काठिन्यम्

किन्तु स्कन्दस्वामिनः ऋग्वेदभाष्यमधिकृत्य भाष्योपपरीक्षणचेष्टा सर्वथाऽपि सुकरा नास्ति इत्यपि मयानुभूतम् । यतो हि संप्रति मुद्रितावस्थायामुपलभ्यमानानि स्कन्दस्वामिनः ऋग्वेदभाष्यसंस्करणानि मिथः विसंवदन्ते । यथा अनन्तशयनग्रन्थावलेः प्रकाशितस्य प्रथमद्वितीयाध्यायमात्रकस्य भाष्यस्य, मद्रासविश्वविद्यालयात् प्रकाशितेन प्रथमाष्टकमितेन स्कन्दस्वामिनः ऋग्वेदभाष्येण सह विसंगतिः । यद्यपि उपपरीक्षया मद्राससंस्करणस्य तृतीयाध्यायादारभ्य अष्टमाध्यायमितस्य भाष्यस्य अनन्तशयनग्रन्थावलिसंस्करणस्य प्रथमद्वितीयाध्या-

ययोः भाष्येण सह सर्वविधसंगतिः लक्ष्येत, तथापि उभयोः कतरत् स्कन्दस्वामिनो भाष्यत्वेन स्वीक्रियेत कतरच्च हीयेत इति प्रश्नो जटिलः । मद्रास-संस्करणस्य प्रथमद्वितीयाध्यायौ परित्यज्य इतरेषु षडध्यायेषु व्याकरणाशुद्धीन् निरीक्ष्य तेषामप्रामाणिकत्वे विचिकित्सा स्वाभाविकी एव ।

कालनिर्द्धारणेऽपि अपरीयः काठिन्यमस्ति । स्कन्दस्वामिनो यावन्मात्रोपलब्धभाष्यस्य अमुद्रितत्वात्, इतरयोः द्वयोः भाष्यकारयोः । (उद्गीथनारायणयोः) कर्तृत्वमकर्तृत्वं वोपपरीक्षितुन्न शक्यते । कर्तृत्वनिर्णयादृतेऽपि स्कन्दस्वामिनः कालनिर्द्धारणे न केवलमुद्गीथनारायणयोरेव प्रसंगात् अपितु निरुक्तभाष्यटीकाकर्त्तुः महेश्वरस्यापि प्रसंगात्, यस्य सहप्रणेतृत्वं स्कन्देन सह निरुक्तभाष्यटीकायां कल्प्यते, काठिन्यं समापतति ।

स्कन्दस्वामिनः वास्तव्यविनिर्णये, तदुद्धृतोपसंहारपद्ये भर्तृध्रुवपदयोचितार्थप्रतिपत्तौ, भाष्यान्तः प्रयुज्यमानानाम् "अस्माभिः" प्रभृतिपदानामर्थेऽपि विप्रतिपत्तयः सन्ति । स्कन्दस्वामिनश्च वेदशाखादिविषये, तस्य स्वकीयधर्मविषये तु किमपि ज्ञायत एव न हि । एतत्सर्वमधिकृत्य किमपि वक्तुमुद्योगः साहसिकमेव । तथापि मया स्कन्दभाष्यम्, तदन्तश्चोपलब्धतथ्यजातञ्च सर्वप्रमाणमधिकृत्य विजिज्ञास्यमानस्य विषयस्योपक्रमः कृतः । स्कन्दस्वामिनः वेदभाष्यस्य सर्वाङ्गसंपूर्णमुद्रणानन्तरमेव सर्वथापि प्रत्ययार्हम् किमपि ज्ञातुं शक्यते इति मनोवचः कर्मभिरेकस्यापि मे स्कन्दविषयिण्यां गवेषणायामेष आरम्भः, पत्रं पुष्पं फलं तोयमिति मन्ये ।

(क्रमशः)

वसिष्ठ ऋषि. । विश्वे देवा देवता. । छन्द त्रिष्टुप् । स्वर धैवत ।
शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभि ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ।३।
शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शं ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभिवातु वात. ।४।
शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ।५।
शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ।६।
शं नः सोमो भवतु ब्रह्म शं न. शं नो ग्रावाणाः शमु सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः ।७।
ऋग्वेद ७-२-३५-३, ४, ५, ६, ७,

(गतमासाङ्कतोऽग्रे)

श्री चैतन्यनीतिशतकम्

लेखकः "श्री चैतन्य"

सुराज्य मानवं धर्मं,
सदाचारयुतं परम् ।
विशुद्धं सद्गुणैर्युक्तं,
जनमध्ये प्रसारयेत् ॥२७०॥

सुराज्यं धर्मराज्यं हि,
पालयेदखिला प्रजाम् ।
मित्रत्वं भ्रातृभावञ्च,
पूरयेल्लोकमण्डलम् ॥२७१॥

धनं भूमिश्च सम्पत्तिः,
राज्यस्य कथिता बुधैः ।
त्यागभावेन भोक्तव्यं,
राष्ट्रस्य धनवैभवम् ॥२७२॥

मातृवत् पितृवद् राज्यं,
सर्वदा पालयेत् प्रजाम् ।
सौभाग्येन सुखेनापि,
योजयेत् सुप्रयत्नत ॥२७३॥

रोगं शोकं च दारिद्रय-,
मभावं चापवित्रताम् ।
अशिक्षां चान्धविश्वासं,
राज्य राष्ट्रस्य नाशयेत् ॥२७४॥

न भवेज्जीविकाहीनो,
कोऽपि नागरिकः क्वचित् ।
अशक्तः पीड़ितः क्वापि,
निर्धनोऽपि कदाचन ॥२७५॥

रुग्णान् वृद्धानशक्तांश्च,
निःसहायान् विपद्गतान् ।
रक्षयेद्राष्ट्रकोषेण,
सर्वानापद्गतान्नरान् ॥२७६॥

कर्महीनो नरो राष्ट्रे,
न भवेत् कोऽपि भारते ।
सर्वे कर्मरता नित्य,
राष्ट्र रक्षन्तु मानवा ॥२७७॥

कोटिशः पुरुषा यत्र,
राष्ट्रसेवासु तत्पराः ।
तत्र किं दुष्करं कर्म,
कठिनं वाति दुस्तरम् ॥२७८॥

राज्यं नागरिकान् सर्वान्,
योजयेद् योग्यकर्मसु ।
ज्ञात्वा शक्ति च योग्यत्व,
रुचिं चैव बलाबलम् ॥२७९॥

सर्वान् नागरिकान् राज्यं,
सेवकत्वे नियोजयेत् ।
उचित वेतनं दत्वा,
राष्ट्रसेवां समाचरेत् ॥२८०॥

शत वाऽथ सहस्रं वा,
न्यूनन्यूनं तथाधिकम् ।
वेतनं मासिकं देय,
राष्ट्रमुद्राङ्कितं सदा ॥२८१॥

दिवसस्य चतुर्थांशो,
राष्ट्रस्य कथितो बुधैः ।
सप्ताह स्त्ववकाशो द्वौ,
दातव्यौ ननु सर्वदा ॥२८२॥

नित्यं नागरिको नूनम्,
षड्होरास्तु समर्पयेत् ।
प्रत्यहं देशसेवार्थ-,
मत्युत्साहेन सर्वदा ॥२८३॥

षण्मासे मासिक दद्या-,
दवकाशं सवेतनम् ।
पञ्चवर्षान्तरे देयो-,
ऽवकाशो वार्षिकः सदा ॥२८४॥

पञ्चविंशतिवर्षाणि,
निस्तन्द्रो देशसेवकः ।
प्राप्य पूर्णावकाशं तु,
लभेतार्धं नु वेतनम् ॥२८५॥

विश्रामे दिवसस्यार्धं,
श्रमेणार्धं नु यापयेत् ।
मनसश्च शरीरस्य,
प्रत्यहं मुदितो नरः ॥२८६॥

शैशवे ज्ञानसंप्राप्तौ,
यौवने राज्यकर्मणि ।
वार्धक्ये जनसेवायां,
सन्नरो दृश्यते रतः ॥२८७॥

शैशवे बालक्रीडायां,
यौवने विषये रताः ।
वार्धक्ये भयचिन्तायां,
दृश्यन्ते प्रायशो जनाः ॥२८८॥

पुञ्जीवादिप्रवृत्तिं तु,
राज्यं संरोधयेत्सदा ।
पातिनीं शोषणीं चैव,
स्वार्थयुक्तां च घातिकाम् ॥२८९॥

निष्कामकर्मयोगस्य,
पुंजीवादो रिपुर्महान् ।
स्वार्थस्योत्पादको ज्ञेयः,
पुंजीवादः सदा बुधैः ॥२९०॥

पुंजीवादेन वैषम्य-,
मर्थस्य जायते महान् ।
स्वार्थान्धं कुरुते लोकं,
पुंजीवादो महान् रिपुः ॥२९१॥

धनवान् पुरुषो नित्यं,
धनशक्तिप्रभावतः ।
निर्धनं शोषयत्येव,
धनसंवर्धनेच्छया ॥२९२॥

देशभक्तिविहीनस्तु,
दृश्यते धनिको नरः ।
सर्वं पापमयं कृत्यं,
कुरुते धनलोलुपः ॥२९३॥

सत्यासत्यप्रयोगेण,
भ्रष्टाचारेण प्रत्यहम् ।
धनसवर्धनं कुर्वन्,
दृश्यते धनिको नरः ॥२९४॥

धनसंवर्धने संलग्नो,
नरस्तु राक्षसो भवेत् ।
धनिको निर्दयो भूत्वा,
जनान् शोषयते सदा ॥२९५॥

लुण्ठति धनिको नित्यं,
सकलान्निर्धनान्नरान् ।
परेषां रुधिरेणैव,
धनिकः स्थूलतां गतः ॥२९६॥

विद्वत्त्वं चाथ शूरत्वं,
हीनतां याति सर्वदा ।
धनिकैः पण्डिताः शूरा,
गण्यन्ते क्षुद्रवत् सदा ॥२९७॥

निर्धनो गुणयुक्तोऽपि,
हास्यतां याति मानवः ।
धनिकः पापयुक्तोऽपि,
सर्वत्र पूज्यते सदा ॥२९८॥

शासकोऽपि मदोन्मत्तः,
कुप्यति निर्धनं प्रति ।
स्थूलमर्थपतिं प्राप्य,
चाटुकारश्च जायते ॥२९९॥

(शेषमग्रिमाङ्के)

साधना

श्रीसत्येन्द्रबाबुकृतसाधनाया अनुवादको महाकविरामकृष्णभट्टः 'हिन्दुकॉलिज' दिल्लीविश्वविद्यालयः

पञ्चमः परिच्छेदः

भिषजा साकमागसिष्टामारक्षिकमहाधिकारी स च मणीन्द्रमहाशयस्तं प्रकोष्ठं यत्रासीत् सा कन्या । पश्यतां तेषां सा खट्वायामुपविष्टाऽधोलम्बमानौ चालयन्ती चरणौ दृष्टिपथमागता । तस्या विक्षिप्तः केशकलापः पृष्ठस्य स्कन्धयोश्चोपरीतस्ततो न्यपतत् । कनीनिकारहिताभ्यामक्षिभ्यां सा समन्तात्पश्यन्ती पादावचालयत् । तस्या अन्यादृशं रूपलावण्यं कृत्स्नमपि तं प्रकोष्ठं प्राकाशयदिव । तादृशं सौन्दर्यं तैर्नान्यत्र कुत्रापि दृष्टचरमासीत् ।

तदा स भिषग्वरो दीर्घं निःश्वस्यावादीत्—"नूनं विधेर्लीला न मानवबुद्धिगोचरा, यदेनामसामान्यशरीरलावण्यामपि सृष्ट्वा सोऽत्यावश्यकप्रधानेन्द्रियत्रयवञ्चितां करोती" ति । महाधिकारी तु विषण्णवदनः सगद्गदमपृच्छत्—

"किमाजन्मन एवेयमेवमास्ते" ? इति ।

"निश्चितं वक्तुं न पार्यते । प्रायेणैव स्यात् ।

"अपि नायं साध्यो व्याधिः ?"

"नास्मदीयचिकित्साया विषयोऽयम् ।"

कस्य दुहिता, कस्य पाणिगृहीती, कुत्र वा न्यवसदित्येतेषामनुयोगानां नेयमुत्तरं दातुं समर्था । अप्यस्याः परिचितः कश्चिदस्ति ?"

अन्वेषणं तु कामं करणीयमेव । तथापि सम्प्रति कस्येयं निकटे न्यासीकार्या ?"

एतावन्तं कालं जोषं स्थितो मणिमहाशयो व्याहरत्—"भवन्तोऽनुमन्यन्ते चेदहमेवैनां स्वगृहे सम्यक् पालयिष्यामि" इति । मुहूर्तमीषच्चिन्तामग्नोऽधिकारी—"यदीयं भवद्वेश्मनि तिष्ठेत्तर्हि न कापि क्षतिः । किन्तु . . ."इत्यंवोक्त्वा मौनमवालम्बत । मणिमहाशयः सततमवतिष्ठते धीरसत्वः सावहित्थश्च । तस्य च प्रारम्भाः फलानुमेयाः । तथापि सम्प्रति स विचलितहृदय इव व्यग्रमना अपृच्छत्—"किन्त्वति भवद्भिरारब्धं वाक्यं सावशेषम् । किन्तत्? " इति । अधिकारी—नास्ति भवतां गेहे काचन सीमन्तिनी । कन्या चान्धाऽनेडमूका च । तथाप्यधितिष्ठति सौन्दर्यस्य परां काष्ठाम् । अतः प्राड्विवाकमहोदयानामिदं प्रायो न सम्मतं भवेत ।

'तर्हि कस्य निकटे निवसेदियम् ? कुत्र वेयमनाथा स्थास्यति निर्बाधम् ?"

"सत्यमेतत् । प्राड्विवाकमहोदयेभ्यः सर्वमेतद् विशदीकरिष्यामि । साम्प्रतमेतया सार्धं गच्छामस्तेषामेव सन्निधिम्" मणिमहाशयस्तस्याः करं जग्राह । कन्या चान्धे नेत्रे तमभि व्यावर्तयत् । मणीन्द्रस्य तस्याः समस्तं गात्रं रोमाञ्चकञ्चुकितमिव प्रतिभाति स्म । तन्मुष्टिगतस्तस्याः करपल्लवोऽपि प्रवातपीडितलताया इव पल्लवो नितरां चकम्पे । स शनैःशनैरादरातिशयेन च सकरावलम्बं तामुदतिष्ठिपत् । सापि सानुरोधमुत्थाय साध्वसाकम्पितहृदयोऽर्भको मातुरिव तस्य शरीरसम्पर्कमेत्यातिष्ठत् । मणीन्द्रस्तां बालां स्वसमीपेऽवस्थाप्य "मा भैषीः । न ते किञ्चिदपि भयमिहास्तीत्ययसान्त्वयत् । ततस्तया सह प्रवहणसमीपमागत्य स तामुभाभ्यां हस्ताभ्यामुत्थाप्य प्रवहणमारोपयामास । तथापि सा तस्य हस्तं नैवाहासीत् । सोऽपि तस्याः पार्श्वं उपाविशत् । अधिकारी च समागत्य तयोस्सम्मुखीनो न्यषीदत् । तदनु तत् स्यन्दनं प्राड्विवाकनिकेतनाय प्रातिष्ठत ।

बालाया मुखचन्द्रबिम्बं पूर्वं विषादघनावृत-मिदानीं तद्विमुक्तं कमनीयकान्ति पुपोषात्मीय-मन्यादृशं लावण्यमहिमानम् ।

स प्राड्विवाको विचित्रदैवदुर्विपाकभागिनीं तां विलोक्य बालां चिन्त्यमानेन चेतसा तन्मुख-चन्द्र एव मुहूर्तं निखातदृष्टिरभूत् । तदाऽऽरक्षि-काधिकारी तस्याः सर्वं वृत्तान्तं तन्न्यासमन्तरेण मणीन्द्रव्याहृत च वाक्य प्राड्विवाकाय सविस्तरं न्यवेदयत् । तदाकर्ण्य सोऽपि तदेव प्रत्याख्यान-मुदाहृत्य "मणिमहाशयानां गृहे कस्या अपि बन्धु-महिलाया अभावाज्जना उच्चावचं जल्पेयु" रित्य-भाणीत् ।

मणीन्द्रः—तथा चेत्, भवतामनुमतेऽहमेवैना-मनाथाममार्गिनीं विकीर्षामि निजां पाणि-गृहीतीम् ।

अज्ञातकुलशीलया, अन्धया, एडमूकया, अनाथया तया कन्ययाऽऽत्मानं गृहिणं कर्तुकामस्य मणिमहाशयस्याकर्ण्य वचनमुभावप्यधिकारिणौ नितरामाश्चर्यचकितौ तन्मुखमेव मुहूर्तं निध्या-यन्तावतिष्ठताम् ।

प्राड्विवाकः—करुणापरवशान्तरङ्गा भवन्तो-ऽनाथामिमामबलामुद्वोढुमपि बद्धश्रद्धा इति सत्यं न वयं जानीमहे कथङ्कारं भवदीयं हृदयमार्दव-मञ्जसा वर्णयेमेति । तथाप्यस्या बान्धवाः भवितव्युः, पतिरप्यस्तीति मन्यामहे । तस्मात्..

मणी—भवद्भिरनुमतः किञ्चिन्निवेदयितु-कामोऽयं जनः ।

"स्वैरं स्वैरं भणन्तु भवन्तः । सञ्जातो भवतु महानस्माकमादरः ।"

"इयं कन्या नाद्य यावदूढा ।"

"कथमवगतमेतत् ?"

"वङ्गाभिजनैषा बाला । तच्चैतन्मुखाकृति-विन्यासेन स्फुटीभवति । हस्तयोर्वलयानि पादयो-रूर्मिके च तत्रत्यानां भवन्ति प्रायेणाभूषणानि योषिताम् ।"

"आकृति काममेनां वङ्गाभिजनां सूचयति ।"

"वङ्गाङ्गनाश्च परिणाताः फाले कुङ्कुम-स्थासकं न्यस्यन्ति हस्त च विभूषयन्त्यायसेन कटकेन । अस्यामुभयमप्येतन्न दृश्यते ।"

"यदि नष्टभर्तृका स्यात् ?"

"न हि, नहि । तथा चेद्धस्तयोर्वलया नाभ-विष्यन् । परिधानं च श्वेतमभविष्यत् ।"

"स्थाने श्लाघ्यं भवतां वैचक्षण्यम् । अनूढाया अप्यस्या बान्धवानामनुमतिमन्तरा विवाहप्रस्ताव-स्य स्वीकारो नास्माकं न्याय्यो भाति ।"

"नास्याः कश्चिद् बान्धवजनः ।"

—o—

वसिष्ठ ऋषिः । विश्वे देवा देवताः । छन्दः त्रिष्टुप् । स्वरः धैवतः ।

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥
शं नो भगः शमु नः शंसो अस्तु शं नः पुरन्धिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२॥

ऋ० ७-२-३५-१,२,

षष्ठः परिच्छेदः

उभावप्यधिकारिणौ मणिमहाशयस्याननमव कीलितदृशावैक्षेताम् । तदा मणीन्द्र सविनयमाह– "मन्ये भवद्भिरिमामन्तरेण न यथावद्विचारितमिति । अन्यथा यन्मयाधिगतमूहापोहप्रणाल्या ततोऽप्यधिकं भवतां गोचरं स्याद्" इति ।

प्राड्विवाकः (किञ्चित्स्मितं कृत्वा)–भवद्भिरिमामधिकृत्य बहु विदितैर्भाव्यम् । अतस्तदाकर्णनकुतूहलिनो वयम् ।

मणीन्द्रः––प्रथमं तावदियं न आग्रानगरवास्तव्या । अत्र हि न सन्ति बहवो वङ्गाभिजनाः । ये त्वत्र निवसन्ति तान्सर्वान्सम्यग्वेदाहम् ।

आरक्षिकाधिकारी––न केवलं वङ्गाभिजना एव, अपितु सर्वेऽप्याग्रानिवासिनो भवतां विदिता एव ।

मणी––इयमनन्यसामान्या कन्या । अस्या वशिष्टचर्मचिराद्भवतामपि भवेद्विदितम् ।

"तत्सर्वेषां सुव्यक्तमेव ।"

"अत एव यदि बन्धवः स्युरस्यास्तर्हि न ते भविष्यन्त्यसुविचेयाः ।"

"अस्याः प्रतिकृतिः समन्तात्प्रहीयते चेत्सर्वोऽप्युदन्तः प्रकाशीभविष्यति ।"

"प्रतिकृतिस्तु कामं प्रेष्यत एव । नैतेन फलं किमपि । यत एतादृशी काचिदन्या कन्या प्रायोऽसम्भावनीया । इयमेडमूका चान्धेति त्रितयमेकत्र समागतम् । तथाप्यद्वितीयरूपसम्पन्नैषा । यतोऽन्यस्या एतादृशगुणविशिष्टायाः सम्भव एव नास्ति, ततः केवलवर्णनाप्रकाशनेनैवास्या बान्धवानामस्तित्वं द्रुतं विज्ञातं भवेत् ।"

अधुनैव भवद्भिरभिहितमस्या न कोऽपि बान्धव इति ।"

"अस्य कारणमस्ति । श्रूयताम्–यदि स्वजनोऽस्या अभविष्यत्, तर्हि नष्टामेनां वार्तापत्रिकाद्वारा प्राख्यापयिष्यत् । आरक्षिकाधिष्ठाने च व्यवहारदानेन सर्वत्र तन्नीवार्ता प्रसार्यमाणा मत्कर्णपथातिथित्वमपि प्रत्यपत्स्यत ।"

"साम्प्रतं तादृशी प्रवृत्तिः समायाता भवेत् ।"

"इयमतीतायामेव क्षपायां कैश्चिदिहानीता । दिनद्वयपूर्वमानीता स्याच्चेत्, तन्मया विदितं स्यात् ।"

"तत्तु वयमज्ञमा जानीमहे । भवतामविदितमिह न किमप्यस्ति वृत्तम् ।"

"मयि विश्वास एव भवत एवं मुखरी करोति । अस्या मुखे यो विषण्णभावः पूर्वमलक्ष्यत स इदानीं विलुप्तः । अतो नेयं स्वजनेन साकमवात्सीत्, अपितु शत्रुवशे निगृहीता न्यवमत् ।"

"भवद्दर्शनमतीव सूक्ष्मम ।"

"अन्धत्वाद् बधिरत्वान्मूकत्वाच्चास्याः स्पर्शेन्द्रियेण सुतरां सूक्ष्मशक्तिभृता भाव्यम् । यथासौ स्पर्शेन विषयान्गृह्णाति न तथा वयम् । यदाहमस्या हस्तमग्रहीषं तदाहमबोधिषि इयं कुलीना, बुद्धिमती, विपन्निमग्ना, अनाथा, दुःखसन्तप्ता, सुखोचिता, स्वजनहीना चेति ।"

"कथं नाम तावदवगतम् ?"

